# वृहद् संकल्प वाक्य

## सर्वविध कल्याण की भावना से किया जाने वाला वृहत् सङ्कल्प-वाक्य

.......... कायिक-वाचिक-मानसिक-सांसार्गिक-चतुर्विधपापक्षयपूर्वकम् आध्यात्मिक-आधिदैविक-आधिभौतिक त्रिविधतापोपशान्ति-सकलदुःखाशेष निवृत्तिपूर्वकम्, व्याध्यादि-जरामृत्युरोगभय-शोकाद्यपसर्ग-निवृत्तिपुरस्सरम् जन्मकुण्डल्याम् , वर्षकुण्डल्याम् गोचरे च अरिष्टस्थितानाम् आदित्यादिनवग्रहाणान्-शुभफलनिरासपूर्वकम् जीवग्रहजन्यजायमान- जनिष्यमाण-सकलारिष्टनिवृत्तिपूर्वकम्, अतिवृष्टि-अनावृष्टि- भूकम्प-राष्ट्रविप्लव-दुर्भिक्षादि विविध-आधि-व्याधि-विविधकष्टनिवृत्तिपूर्वक-नित्यकल्याणप्राप्त्यर्थम् , विपुलधनधान्य-दीर्घायुष्टवनैरुज्य-कीर्तिलाभ-सद्विद्योपार्जनक्षेम-स्थैर्यैश्वर्य-गो-गजाश्वादिसम्पत्तप्रवृद्ध्यर्थम् सद्धर्मसद्बुद्धि -सद्विद्या-सद्विवेक-सदाचारादिप्राप्त्यर्थम् तथैक विंशतिकुलोद्धरणपूर्वकम् समस्तपितृणाम्-निरतिशयानन्दशाश्वत-बैकुण्ठलोक-प्राप्त्यर्थम् च सनातनधर्मेस्मिन-निरतिशय-श्रद्धाभक्ति-सम्पत्त्यर्थम् सनातनधर्मप्रतिपादकानान् सांगानाम् सरहस्यानाम् श्रुति-स्मृति-पुराणोपपुराणादीनाम् धार्मिकग्रन्थानाम् सर्वासाम्- विद्यानाम् च अभिवृद्यर्थम् जाति-देश-धर्म-समाज-राष्ट्रभ्युत्थानपूर्वक-तत्तत्सम्प्रदायादिविशिष्टस्य समस्तविश्वयस्य सर्वविधकल्याणसम्पादनार्थम् विशेषतः सनातने स्वधर्मे प्रीतिविवर्द्धनार्थम्-

सर्वे भवन्तु सुखिनः सन्तु सर्वे सन्तु निरामयाः । सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ।।
इति सदुद्देश्यसिद्धिद्वारा विश्वस्मिन जगति सर्वविधशान्त्यर्थम् च पुण्यकालेस्मिन अनन्त कल्याणगुणगुणाकरस्य .......(अपने गुरु का नाम लेवें).......पादारविन्दस्य श्रीगुरुआज्ञानिर्देशपूर्वकम् ......(जो भी अनुष्ठान, हवन आदि कर्म कर रहे हों उसका पूरा नाम लेवें) करिष्ये । इस प्रकार से सङ्कल्प पढ़कर जल छोड़ें ।

***